# ॥ શ્રીવિષ્ણુસ્તવનં માર્કણ્ડેયપ્રોક્તં નરસિંહપુરાણે ॥

.. Shri Vishnustavan by
Markendeya in Narasimhapurana ..

sanskritdocuments.org

September 11, 2017

.. Shri Vishnustavan by Markendeya in Narasimhapurana ..

॥ શ્રીવિષ્ણુસ્તવનં માર્કણ્ડેયપ્રોક્તં નરસિંહપુરાણે ॥

# Sanskrit Document Information

Text title : Shri Vishnustavan by Markendeya in Narasimhapurana

File name : viShNustavanamArkaNDeyoktamNP.itx

Category : vishhnu, stotra

Location : doc_vishhnu

Proofread by : Singanallur Ganesan singanallur at gmail.com

Translated by : https://archive.org/details/NarsimhaPuranGitapress

Description-comments : Narasimhapurana adhyAya 11

Latest update : June 6, 2013

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

September 11, 2017

*sanskritdocuments.org*

વ્યાસ ઉવાચ –
પ્રણિપત્ય જગન્નાથં ચરાચરગુરું હરિમ્ ।
માર્કણ્ડેયોઽભિતુષ્ટાવ ભોગપર્યઙ્કશાયિનમ્ ॥ ૧॥

માર્કણ્ડેય ઉવાચ –
પ્રસીદ ભગવન્ વિષ્ણો પ્રસીદ પુરુષોત્તમ ।
પ્રસીદ દેવદેવેશ પ્રસીદ ગરુડધ્વજ ॥ ૨॥

પ્રસીદ વિષ્ણો લક્ષ્મીશ પ્રસીદ ધરણીધર ।
પ્રસીદ લોકનાથાદ્ય પ્રસીદ પરમેશ્વર ॥ ૩॥

પ્રસીદ સર્વદેવેશ પ્રસીદ કમલેક્ષણ ।
પ્રસીદ મન્દરધર પ્રસીદ મધુસૂદન ॥ ૪॥

પ્રસીદ સુભગાકાન્ત પ્રસીદ ભુવનાધિપ ।
પ્રસીદાદ્ય મહાદેવ પ્રસીદ મમ કેશવ ॥ ૫॥

જય કૃષ્ણ જયાચિન્ત્ય જય વિષ્ણો જયાવ્યય ।
જય વિશ્વ જયાવ્યક્ત જય વિષ્ણો નમોઽસ્તુ તે ॥ ૬॥

જય દેવ જયાજેય જય સત્ય જયાક્ષર ।
જય કાલ જયેશાન જય સર્વ નમોઽસ્તુ તે ॥ ૭॥

જય યજ્ઞપતે નાથ જય વિશ્વપતે વિભો ।
જય ભૂતપતે નાથ જય સર્વપતે વિભો ॥ ૮॥

જય વિશ્વપતે નાથ જય દક્ષ નમોઽસ્તુ તે ।
જય પાપહરાનન્ત જય જન્મજરાપહ ॥ ૯॥

જય ભદ્રાતિભદ્રેશ જય ભદ્ર નમોઽસ્તુ તે ।
જય કામદ કાકુત્સ્થ જય માનદ માધવ ॥ ૧૦॥

જય શંકર દેવેશ જય શ્રીશ નમોઽસ્તુ તે ।
જય કુઙ્કુમરક્તાભ જય પઙ્કજલોચન ॥ ૧૧॥

જય ચન્દનલિપ્તાઙ્ગ જય રામ નમોઽસ્તુ તે ।
જય દેવ જગન્નાથ જય દેવકિનન્દન ॥ ૧૨॥

જય સર્વગુરો જ્ઞેય જય શમ્ભો નમોઽસ્તુ તે ।

જય સુન્દર પદ્મનાભ જય સુન્દરિવલ્લભ ।
જય સુન્દરસર્વાઙ્ગ જય વન્દ્ય નમોઽસ્તુ તે ॥ ૧૩॥

જય સર્વદ સર્વેશ જય શર્મદ શાશ્વત ।
જય કામદ ભક્તાનાં પ્રભવિષ્ણો નમોઽસ્તુ તે ॥ ૧૪॥

નમઃ કમલનાભાય નમઃ કમલમાલિને ।
લોકનાથ નમસ્તેઽસ્તુ વીરભદ્ર નમોઽસ્તુ તે ॥ ૧૫॥

નમસ્ત્રૈલોક્યનાથાય ચતુર્મૂર્તે જગત્પતે ।
નમો દેવાધિદેવાય નમો નારાયણાય તે ॥ ૧૬॥

નમસ્તે વાસુદેવાય નમસ્તે પીતવાસસે ।
નમસ્તે નરસિંહાય નમસ્તે શાર્ઙ્ગધારિણે ॥ ૧૭॥

નમઃ કૃષ્ણાય રામાય નમશ્ચક્રાયુધાય ચ ।
નમઃ શિવાય દેવાય નમસ્તે ભુવનેશ્વર ॥ ૧૮॥

નમો વેદાન્તવેદ્યાય નમોઽનન્તાય વિષ્ણવે ।
નમસ્તે સકલાધ્યક્ષ નમસ્તે શ્રીધરાચ્યુત ॥ ૧૯॥

લોકાધ્યક્ષ જગત્પૂજ્ય પરમાત્મન્ નમોઽસ્તુ તે ।
ત્વં માતા સર્વલોકાનાં ત્વમેવ જગતઃ પિતા ॥ ૨૦॥

ત્વમાર્તાનાં સુહૃન્મિત્રં પ્રિયસ્ત્વં પ્રપિતામહઃ ।
ત્વં ગુરુસ્ત્વં ગતિઃ સાક્ષી ત્વં પતિસ્ત્વં પરાયણઃ ॥ ૨૧॥

ત્વં ધ્રુવસ્ત્વં વષટ્કર્તા ત્વં હવિસ્ત્વં હુતાશનઃ ।
ત્વં શિવસ્ત્વં વસુર્ધાતા ત્વં બ્રહ્મા ત્વં સુરેશ્વરઃ ॥ ૨૨॥

ત્વં યમસ્ત્વં રવિર્વાયુસ્ત્વં જલં ત્વં ધનેશ્વરઃ ।
ત્વં મનુસ્ત્વમહોરાત્રં ત્વં નિશા ત્વં નિશાકરઃ ।
ત્વં ધૃતિસ્ત્વં શ્રિયઃ કાન્તિસ્ત્વં ક્ષમા ત્વં ધરાધરઃ ॥ ૨૩॥

ત્વં કર્તા જગતામીશસ્ત્વં હન્તા મધુસૂદન ।
ત્વમેવ ગોપ્તા સર્વસ્ય જગતસ્ત્વં ચરાચર ॥ ૨૪॥

કરણં કારણં કર્તા ત્વમેવ પરમેશ્વરઃ ।
શઙ્ખચક્રગદાપાણે ભો સમુદ્ધર માધવ ॥ ૨૫॥

પ્રિય પદ્મપલાશાક્ષ શેષપર્યઙ્કશાયિનમ્ ।
ત્વામેવ ભક્ત્યા સતતં નમામિ પુરુષોત્તમમ્ ॥ ૨૬॥

શ્રીવત્સાઙ્કં જગદ્બીજં શ્યામલં કમલેક્ષણમ્ ।
નમામિ તે વપુર્દેવ કલિકલ્મષનાશનમ્ ॥ ૨૭॥

લક્ષ્મીધરમુદારાઙ્ગં દિવ્યમાલાવિભૂષિતમ્ ।
ચારુપૃષ્ઠં મહાબાહું ચારુભૂષણભૂષિતમ્ ॥ ૨૮॥

પદ્મનાભં વિશાલાક્ષં પદ્મપત્રનિભેક્ષણમ્ ।
દીર્ઘતુઙ્ગમહાઘ્રાણં નીલજીમૂતસંનિભમ્ ॥ ૨૯॥

દીર્ઘબાહું સુગુપ્તાઙ્ગં રત્નહારોજ્જ્વલોરસમ્ ।
સુભ્રૂલલાટમુકુટં સ્નિગ્ધદન્તં સુલોચનમ્ ॥ ૩૦॥

ચારુબાહું સુતામ્રોષ્ઠં રત્નોજ્જ્વલિતકુણ્ડલમ્ ।
વૃત્તકણ્ઠં સુપીનાંસં સરસં શ્રીધરં હરિમ્ ॥ ૩૧॥

સુકુમારમજં નિત્યં નીલકુઞ્ચિતમૂર્ધજમ્ ।
ઉન્નતાંસં મહોરસ્કં કર્ણાન્તાયતલોચનમ્ ॥ ૩૨॥

હેમારવિન્દવદનમિન્દિરાયનમીશ્વરમ્ ।
સર્વલોકવિધાતારં સર્વપાપહરં હરિમ્ ॥ ૩૩॥

સર્વલક્ષણસમ્પન્નં સર્વસત્ત્વમનોરમમ્ ।
વિષ્ણુમચ્યુતમીશાનમનન્તં પુરુષોત્તમમ્ ॥ ૩૪॥

નતોઽસ્મિ મનસા નિત્યં નારાયણમનામયમ્ ।
વરદં કામદં કાન્તમનન્તં સૂનૃતં શિવમ્ ॥ ૩૫॥

નમામિ શિરસા વિષ્ણો સદા ત્વાં ભક્તવત્સલ ।
અસ્મિન્નેકાર્ણવે ઘોરે વાયુસ્કમ્પિતચઞ્ચલે ॥ ૩૬॥

અનન્તભોગશયને સહસ્રફણશોભિતે ।
વિચિત્રશયને રમ્યે સેવિતે મન્દવાયુના ॥ ૩૭॥

ભુજપઞ્જરસંસક્તકમલાલયસેવિતમ્ ।
ઇહ ત્વાં મનસા સર્વમિદાનીં દૃષ્ટવાનહમ્ ॥ ૩૮॥

ઇદાનીં તુ સુદુઃખાર્થો માયયા તવ મોહિતઃ ।

એકોદકે નિરાલમ્બે નષ્ટસ્થાવરજઙ્ગમે ॥ ૩૯॥

શૂન્યે તમસિ દુષ્પારે દુઃખપઙ્કે નિરામયે ।
શીતાતપજરારોગશોકતૃષ્ણાદિભિઃ સદા ॥ ૪૦॥

પીડિતોઽસ્મિ ભૃશં તાત સુચિરં કાલમચ્યુત ।
શોકમોહગ્રહગ્રસ્તો વિચરન્ ભવસાગરે ॥ ૪૧॥

ઇહાદ્ય વિધિના પ્રાપ્તસ્તવ પાદાબ્જસંનિધૌ ।
એકાર્ણવે મહાઘોરે દુસ્તરે દુઃખપીડિતઃ ॥ ૪૨॥

ચિરભ્રમપરિશ્રાન્તસ્ત્વામદ્ય શરણં ગતઃ ।
પ્રસીદ સુમહામાય વિષ્ણો રાજીવલોચન ॥ ૪૩॥

વિશ્વયોને વિશાલાક્ષ વિશ્વાત્મન્ વિશ્વસમ્ભવ ।
અનન્યશરણં પ્રાપ્તમતોઽત્ર કુલનન્દન ॥ ૪૪॥

ત્રાહિ માં કૃપયા કૃષ્ણ શરણાગતમાતુરમ્ ।
નમસ્તે પુણ્ડરીકાક્ષ પુરાણપુરુષોત્તમ ॥ ૪૫॥

અઞ્જનાભ હૃષીકેશ માયામય નમોઽસ્તુ તે ।
મામુદ્ધર મહાબાહો મગ્નં સંસારસાગરે ॥ ૪૬॥

ગહ્વરે દુસ્તરે દુઃખક્લિષ્ટે ક્લેશમહાગ્રહૈઃ ।
અનાથં કૃપણં દીનં પતિતં ભવસાગરે ।
માં સમુદ્ધર ગોવિન્દ વરદેશ નમોઽસ્તુ તે ॥ ૪૭॥

નમસ્ત્રૈલોક્યનાથાય હરયે ભૂધરાય ચ ।
દેવદેવ નમસ્તેઽસ્તુ શ્રીવલ્લભ નમોઽસ્તુ તે ॥ ૪૮॥

કૃષ્ણ કૃષ્ણ કૃપાલુસ્ત્વમગતીનાં ગતિર્ભવાન્ ।
સંસારાર્ણવમગ્નાનાં પ્રસીદ મધુસૂદન ॥ ૪૯॥

ત્વામેકમાદ્યં પુરુષં પુરાણં જગત્પતિં કારણમચ્યુતં પ્રભુમ્ ।
જનાર્દનં જન્મજરાર્તિનાશનં સુરેશ્વરં સુન્દરમિન્દિરાપતિમ્ ॥ ૫૦॥

બૃહદ્ભુજં શ્યામલકોમલં શુભં વરાનનં વારિજપત્રનેત્રમ્ ।
તરંગભઙ્ગાયતકુન્તલં હરિં સુકાન્તમીશં પ્રણતોઽસ્મિ શાશ્વતમ્ ॥ ૫૧॥

સા જિહ્વા યા હરિં સ્તૌતિ તચ્ચિત્તં યત્ત્વદર્પિતમ્ ।

તાવેવ કેવલૌ શ્લાઘ્યૌ યૌ ત્વત્પૂજાકરૌ કરૌ ॥ ૫૨॥

જન્માન્તરસહસ્રેષુ યન્મયા પાતકં કૃતમ્ ।
તન્મે હર ત્વં ગોવિન્દ વાસુદેવેતિ કીર્તનાત્ ॥ ૫૩॥

વ્યાસ ઉવાચ –
ઇતિ સ્તુતસ્તતો વિષ્ણુર્માર્કણ્ડેયેન ધીમતા ।
સંતુષ્ટઃ પ્રાહ વિશ્વાત્મા તં મુનિં ગરુડધ્વજઃ ॥ ૫૪॥

શ્રીભગવાનુવાચ –
પ્રીતોઽસ્મિ તપસા વિપ્ર સ્તુત્યા ચ ભૃગુનન્દન ।
વરં વૃણીષ્વ ભદ્રં તે પ્રાર્થિતં દદ્મિ તે વરમ્ ॥ ૫૫॥

માર્કણ્ડેય ઉવાચ –
ત્વત્પાદપદ્મે દેવેશ ભક્તિં મે દેહિ સર્વદા ।
યદિ તુષ્ટો મમાદ્ય ત્વમન્યદેકં વૃણોમ્યહમ્ ॥ ૫૬॥

સ્તોત્રેણાનેન દેવેશ યસ્ત્વાં સ્તોષ્યતિ નિત્યશઃ ।
સ્વલોકવસતિં તસ્ય દેહિ દેવ જગત્પતે ॥ ૫૭॥

દીર્ઘાયુષ્ટ્વં તુ યદ્દત્તં ત્વયા મે તપ્યતઃ પુરા ।
તત્સર્વં સફલં જાતમિદાનીં તવ દર્શનાત્ ॥ ૫૮॥

વસ્તુમિચ્છામિ દેવેશ તવ પાદાબ્જમર્ચયન્ ।
અત્રૈવ ભગવન્ નિત્યં જન્મમૃત્યુવિવર્જિતઃ ॥ ૫૯॥

શ્રીભગવાનુવાચ –
મય્યસ્તુ તે ભૃગુશ્રેષ્ઠ ભક્તિરવ્યભિચારિણી ।
ભક્ત્યા મુક્તિર્ભવત્યેવ તવ કાલેન સત્તમ ॥ ૬૦॥

યસ્ત્વિદં પઠતે સ્તોત્રં સાયં પ્રાતસ્તવેરિતમ્ ।
મયિ ભક્તિં દૃઢાં કૃત્વા મમ લોકે સ મોદતે ॥ ૬૧॥

યત્ર યત્ર ભૃગુશ્રેષ્ઠ સ્થિતસ્ત્વં માં સ્મરિષ્યસિ ।
તત્ર તત્ર સમેષ્યામિ દાન્તો ભક્તવશોઽસ્મિ ભોઃ ॥ ૬૨॥

વ્યાસ ઉવાચ –
ઇત્યુક્ત્વા તં મુનિશ્રેષ્ઠં માર્કણ્ડેયં સ માધવઃ ।

વિરરામ સ સર્વત્ર પશ્યન્ વિષ્ણું યતસ્તતઃ ॥ ૬૩॥

ઇતિ તે કથિતં વિપ્ર ચરિતં તસ્ય ધીમતઃ ।
માર્કણ્ડેયસ્ય ચ મુનેસ્તેનૈવોક્તં પુરા મમ ॥ ૬૪॥

યે વિષ્ણુભક્ત્યા ચરિતં પુરાણં ભૃગોસ્તુ પૌત્રસ્ય પઠન્તિ નિત્યમ્ ।
તે મુક્તપાપા નરસિંહલોકે વસન્તિ ભક્તૈરભિપૂજ્યમાનાઃ ॥ ૬૫॥

ઇતિ શ્રીનરસિંહપુરાણે માર્કણ્ડેયચરિતં નામ એકાદશોઽધ્યાયઃ ॥ ૧૧॥

Narasimhapurana adhyAya 11
https://archive.org/details/NarsimhaPuranGitapress

Proofread by Singanallur Ganesan singanallur at gmail.com

.. Shri Vishnustavan by Markendeya in Narasimhapurana ..

Searchable pdf was typeset using generateactualtext feature of XƎLaTeX 0.99996

on September 11, 2017

Please send corrections to *sanskrit@cheerful.com*